मयस्वीकरणे "श्रुत्वाभियोगं प्रत्यर्थी यदि तं प्रतिपद्यते। सा तु सम्प्रतिपत्तिः स्यादि"ति २स्मृत्युक्ते व्यवहारे उत्तरभेदे च "मिथ्या सम्प्रतिपत्तिश्च प्रत्यवस्कन्दनं तथा। प्राङ्न्यायश्चोत्तराः प्रोक्ताश्चत्वारः शास्त्रवेदिभिः" उत्तरशब्दे १०१८ पृ० दृश्यम्।

**सम्प्रदातृ** त्रि० सम्+प्र+दा–तृच्। दानकर्त्तरि स्त्रियां ङीप्।

**सम्प्रदान** न० सम्+प्र+दा–भावे ल्युट्। १सम्यक्प्रदाने। सम्प्रदीयतेऽस्मै ल्युट्। "कर्मणा यमभिप्रैति स सम्प्रदानमि"ति पाणिन्युक्ते २दानकर्मोद्देश्ये। तच्च त्रिविधम्। "अनिराकरणात्कर्त्तुस्त्यागाङ्गं कर्मणेप्सितम्। प्रेरणानुमतिभ्याञ्च लभते सम्प्रदानताम्" इत्युक्तेः। तत्र विप्राय वस्त्रं ददातीत्यादौ अनिराकर्त्तृ सम्प्रदानम्, याचकाय धनं ददातीत्यादौ प्रेरयितृ सम्प्रदानम्, गुरवे धनं ददातीत्यादौ अनुमन्तृ सम्प्रदानम्। गौणमुख्यसाधारणे सम्प्रदाने चतुर्थी पा०। तल्लक्षणं तु शब्दश० प्र० दर्शितं यथा "गत्यादिभिन्ने धात्वर्थे चतुर्थ्या विग्रहस्य या। यः स्वार्थो बोधनीयस्तत्सम्प्रदानत्वमीरितम्"। "गत्यादिभिन्ने यद्धातूपस्थाप्ये यादृशार्थे विग्रहस्यचतुर्थ्या यः स्वार्थो बोधयितुं शक्यते स तद्धातूपस्थाप्यतादृशक्रियायां सम्प्रदानत्वमुच्यते। ब्राह्मणाय दानं धनस्येत्यादौ ददातेः स्वत्वजनकत्यागोऽर्थस्तन्निविष्टे च स्वत्वे ब्राह्मणादेः प्रतियोगित्वं निरूपितत्वं वा चतुर्थ्या बोध्यते इति तदेव तत्र सम्प्रदानत्वं ब्राह्मणप्रतियोगिकं ब्राह्मणनिरूपितं वा यद्धनवृत्ति स्वत्वं तज्जनकस्त्याग इत्येवं तत्र प्रत्ययात् धात्वर्थतावच्छेदकीभूतस्वत्वाख्यफलवत्तया धनादेर्दानकर्मत्वात्। न चैवं पशुकामनया यागकरणदशायां चैत्रः स्वात्मने पशुं ददातीत्यपि प्रयोगापत्तिस्तादृशयागस्य चैत्रीयं यत् पशुनिष्ठं स्वत्वं तज्जनकत्यागत्वादिति वाच्यं स्वत्वध्वंसजनकक्रियापर्य्यवसन्नस्य त्यागस्यैकदेशे स्वत्वध्वंसेऽपि द्वितीयाद्यर्थस्यान्वयेन पशुफलकयागे पशुनिष्ठस्य स्वत्वध्वंसस्य जनकत्वविरहादेव तद्वाक्यस्याप्रमाणत्वात्। ग्रामाय गत इत्यादौ विग्रहस्यचतुर्थ्या धात्वर्थे बोध्यमपि कर्मत्वं न गत्यादिभिन्ने चतुर्थ्या बोधनीयम्। संवर्द्धयितुमित्यादि तुमर्थो न विग्रहस्येति न तत्र प्रसङ्गः। सम्प्रदानशब्दस्तु स्वाश्रयगोचरत्यागजन्यस्वत्वस्य प्रतियोगिन्येव शक्त इति स्वत्वप्रतियोगित्वं सम्प्रदानत्वमित्यादिको न प्रयोगः। न च दानस्य स्वत्वहेतुत्वे प्रमाणाभावः। "सप्त वित्तागमा धर्म्या दायो लाभः क्रयो जयः। प्रयोगः कर्म्मयोगश्च सत्प्रतिग्रह एव च" इत्यादिमन्वादिवचनैस्तस्य स्वत्वहेतुत्वप्रतिपादनादिति वाच्यं ब्राह्मणाय त्यक्तायां गवि गौरियं ब्राह्मणस्य न तु ममेत्यादिसर्वजनीनप्रतीतेरेव तत्र प्रमाणत्वात् "प्रदानं स्वाम्यकारणमिति" वचनाच्च। अतएव विदेशस्थं पात्रमुद्दिश्य त्यक्तधने स्वीकारमन्तरेणैव पात्रस्य मरणस्थले पितृदायत्वेन तद्धनं पुत्रादिभिर्विभज्य गृह्यते अन्यथा तैरिव उदासीनैरपि तद्धनस्यारण्यकुशादेरिवोपादाने यथेष्टनियोगे च प्रत्यवायो न स्यात्। नन्वेवं दानादेव स्वत्वसिद्धेर्दत्तवस्तुनि स्वीकारो व्यर्थ इति चेन्न "लब्ध्वा चाष्टगुणं फलम्" इत्यादिस्मृतेः प्रतिगृहीतद्रव्यदानस्य फलविशेषं प्रति हेतुत्वेन तादृशफलसम्पत्त्यर्थमेव प्रतिग्रहस्योपयोगात् "याजनाध्यापनप्रतिग्रहैर्द्विजो धनमर्जयेदित्यादि" श्रुत्या प्रागुक्तस्मृत्या च प्रतिग्रहस्यापि स्वत्वहेतुत्वबोधनाच्च स्वत्वजनकव्यापारस्यैवार्जनपदार्थत्वात्। दासाय भक्ष्यं ददाति भृतकाय वेतनं ददातीत्यादावपि स्वत्वजनकत्यागं प्रतिपादयन् ददातिर्मुख्य एव पुण्यजनकन्तु न तादृशं दानमवैधत्वात्। यत्तु स्वीकारजन्यस्य स्वत्वस्य जनकस्त्यागो दानं मनसा पात्रमुद्दिश्य धनत्यागस्तु न दानं किन्तूत्सर्गमात्रं प्रतिग्रहजन्यस्वत्वं प्रति हेतुभूतवैधत्यागस्यैव तथात्वात्, उपेक्षा तु स्वत्वध्वंसमात्रजनकस्त्यागो न तु तत्र स्वत्वजनकत्वस्यान्तर्भाव इति केचिदूचुस्तन्न युक्तं लाघवेन स्वत्वजनकत्यागस्यैव ददात्यर्थत्वात्। तिलानस्मै प्रतियच्छति तुरगमस्मै विक्रीणीते इत्यादौ द्रव्यान्तरग्रहणपूर्वकं दानमेव प्रतिदानं मूल्यग्रहणपूर्वकं दानमेव च विक्रय इति तत्रापि मुख्यमेव सम्प्रदानत्वं चतुर्थ्या बोध्यते तिलादिकस्य न मूल्यं पणपुराणादेरेव शास्त्रे तथात्वोपदेशात्। अदृष्टार्थं दत्तस्यैव च स्वीकारः प्रतिग्रह इति परेण प्रीतिदत्तस्य विक्रीतस्य वा तिलतुरगादेः स्वीकारो न दोषावहः। चैत्राय रोचते मोदक इत्यत्र चतुर्थ्या धात्वर्थान्वितमाश्रयत्वं धातुना च भक्ष्यत्वप्रकारकेच्छोपस्थाप्यते तिङा तु प्रकाशत इत्यादाविव विषयत्वलक्षणं कर्तृत्वं तथाच चैत्रनिष्ठाया भक्ष्यत्वप्रकारकेच्छाया विषयतावान्मोदक इत्याकारकस्तत्र बोधः। गुरवे गां धारयते इत्यत्र धृञा स्वत्वावस्थितिर्द्वितीयया तदन्वितं कर्तृत्वं चतुर्थ्या च तन्निविष्टस्वत्वान्वितं सम्बन्धित्वमुपस्थाप्यते तेन गोकर्तृकाया गुरुसम्बन्धिस्वत्वाव-